कन्यादानं, क्ली, (कन्याया दानं वराय सम्प्रदानम् ।) वराय कन्यासम्प्रदानम् । तद्दानफलादि यथा ।
यम उवाच ।
"कन्यां ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम् ।
ब्रह्मदेया द्विजश्रेष्ठ! ब्रह्मलोकं व्रजन्ति ते ॥
कन्यादानन्तु सर्व्वेषां दानानामुत्तमं स्मृतम्" ॥*॥
तदग्रहणे दशकुलत्यागो यथा,—
"महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः ।
स्त्रीसम्बन्धे दशेमानि कुलानि परिवर्ज्जयेत् ॥
हीनजातिषु पाषण्डे सूने उद्वेगकारिणाम् ।
यक्ष्मामयसदावाप्यश्वित्रिकुष्ठिकुणानि च ॥
यस्यास्तु न भवेत् भ्राता न च विज्ञायते पिता ।
नोपयच्छेत तां प्राज्ञः पुत्त्रिकाधर्म्मशङ्कया" ॥*॥
ततोऽष्टप्रकारविवाहानन्तरम् ।
"कन्यां ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम् ।
विवाहकाले संप्राप्ते यथोक्ते सदृशे वरे ।
क्रमात् क्रमं क्रतुशतमनुपूर्व्वं लभन्ति ते ॥
श्रुत्वा कन्याप्रदानन्तु पितरः प्रपितामहाः ।
विमुक्ताः सर्व्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते ॥
ब्राह्मेण तु विवाहेन यस्तु कन्यां प्रयच्छति ।
ब्रह्मलोकं व्रजेच्छीघ्रं ब्रह्माद्यैः पूजितः सुरैः ॥
दिव्येन तु विवाहेन यस्तु कन्यां प्रयच्छति ।
भित्त्वा द्वारन्तु सूर्य्यस्य स्वर्गलोकञ्च गच्छति ॥
गान्धर्व्वेण विवाहेन यस्तु कन्यां प्रयच्छति ।
गन्धर्व्वलोकमासाद्य क्रीड़ते देववच्चिरम् ॥
शुल्केन दत्त्वा यः कन्यां तां पश्चात् सन्यगर्च्चयेत् ।
स किन्नरैश्च गन्धर्व्वैः क्रीड़ते कालमक्षयम् ॥
न मन्युं कारयेत्तासां पूज्याश्च सततं गृहे ।
ब्रह्मदेया विशेषेण ब्राह्मभोज्या सदा भवेत् ॥
कन्यायां ब्रह्मदेयायामभुञ्जन् सुखमश्नुते ।
अथ भुञ्जति यो मोहात् भुक्त्वा स नरकं व्रजेत् ॥
अप्रजायाश्च कन्यायां न भुञ्जीयात् कदाचन ।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि ॥
महासत्वसमाकीर्णान्नाप्ति ते नरकाद्भयम् ।
तीर्णस्त्वं सर्व्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि ॥
दौहित्रस्य तु दानेन नन्दन्ति पितरः सदा ।
यत्किञ्चित् कुरुते दानं तदानन्त्याय कल्प्यते ॥
मातापितुश्च विज्ञेयं तच्छुभस्याभिगामिनः ।
मातुः पितुर्हिरण्यस्य दौहित्रोऽर्द्धमवाप्नुते ॥
दत्त्वा कन्यां न शोचेत क्षुधितां मुदितां तथा ।
नग्नां दुःखाभिभूतां वा तथैव कृपणां कृशाम् ।
कुर्य्यान्मन्युं नचैवास्या आगताश्चापि पोषयेत् ॥
यद्भूतमर्थयेत् किञ्चित् सर्व्वं तत् प्रतिपादयेत् ।
अप्रयच्छन् पतेत् ब्रह्मन्! नरके नात्र संशयः" ॥*॥
"शोचन्ति यामयो यत्र विनश्यत्याशु तत्कुलम् ।
न भुञ्जन्ति च यत्रैव निर्दहन्त्यप्रपूजिताः ॥
तस्मादेताः समभ्यर्च्च्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सुतयुक्तास्तु सर्व्वदा ॥
संभ्रमाः स्युस्तया पूज्याः श्राद्धे चैवोत्सवेषु च ।
यस्मिन्नेवं कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥
इह कीर्त्तिर्भवेत् स्वर्गे परत्र द्विजसत्तम ! ।
तिलराशिः कृतो यावत् दिवाकरसमं कृतः ॥
वर्षान्ते गृह्यमानस्तु तिल एको भवेद् यदा ।
सोऽक्षयं लभते तावत् ब्रह्मलोकं सनातनम् ॥
शतगव्याः प्रमाणेन सुह्यते रोमसञ्चये ।
विशीर्य्यते तु वा लोकं वर्षे पूर्णे सुताप्रदः ।
तावत् स्वर्गं लभेत् सोऽपि यावल्लोमस्य संक्षयः ॥
महीदातुश्च गोदातुः कन्यादातुस्त्रयो रथाः ।
कन्यादात्रनुगाः पश्चात्समं यान्ति त्रयो रथाः ॥
कन्यादानं दरिद्रस्य यो ददाति सुसत्कृतैः ।
पूर्व्वं धर्म्ममवाप्नोति यथावत् विधिकल्पितम् ।
तस्मात्कन्या प्रयत्नेन दातव्या श्रेय इच्छता" ॥
इत्याद्ये वह्निपुराणे कन्यादाननामाध्यायः ॥

कन्यापतिः, पुं, (कन्यायाः पतिः ।) जामाता । इति जटाधरः ॥

कन्यापालः, पुं, (कन्याप्रधानः पालः । पालाख्य-वणिगिति यावत् ।) पालवणिक् । शूद्रजातिविशेषः । इति त्रिकाण्डशेषः ॥

कन्यारामः, पुं, बुद्धभेदः । इति त्रिकाण्डशेषः ॥

कन्यिका, स्त्री, (कन्या एव स्वार्थे कन् टाप् अत-इत्वम् ।) कन्यका । इति शब्दरत्नावली ॥

कन्युषं, क्ली, (कन+इन् । कन्या दीप्त्या कान्त्या तेजसा वा ओषति इव । कनि+उष्+कः ।) हस्तपुच्छः । इति हारावली । हातेर पोँछा इति भाषा ॥

कप चलने । सौत्रधातुरयं । इति कविकल्पद्रुमः ॥ (भ्वां—परं—अकं—सेट् ।) कपोलः । इति दुर्गादासः ॥

कप इ ङ सञ्चलने । इति कविकल्पद्रुमः ॥ (भ्वां—आत्मं—अकं—सेट्—इदित् ।) इ कर्म्मणि कम्प्यते ॥ ङ कम्पते वायुना वृक्षः । इति दुर्गादासः ॥

कपटः, पुं, क्ली, (पटतीति पटः । पट्+अच् । कस्य सतो ब्रह्मणोऽपि पटः आवरकः । यद्वा कप+अटन् ।) अयथार्थव्यवहारः । प्रतारणा । तत्पर्य्यायः । व्याजः २ दम्भः ३ उपधिः ४ छद्म ५ कैतवम् ६ । इत्यमरः । १ । ७ । ३० ॥ कूटम् ७ कल्कम् ८ छलम् ९ मिषम् १० कैरवम् ११ । इति शब्दरत्नावली ॥
("नरेन्द्रसिंह ! कपटं न वोढुं त्वमिहार्हसि" । इति महाभारते १ । ७४ । १०१ ॥ दनुपुत्त्रः । यथा महाभारते १ । ६५ । २५ ।
"निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा ।
एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः" ॥)

कपटिकः, त्रि, (कपटः विद्यतेऽस्मिन् अस्त्यस्य वा । कपट+मत्वर्थे+ठन् ।) कपटविशिष्टः । इति शब्दरत्नावली ॥

कपटिनी, स्त्री, (कपटिन्+गौरादित्वात् ङीष् ।) चोड़ानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

कपटी, स्त्री, (कप+अटन् । गौरादित्वात् ङीष् ।) परिमाणविशेषः । इति शब्दरत्नावली । एक आँकाड़ इति भाषा ॥

कपटी, [न्] त्रि, (कपटोऽस्त्यस्य अस्मिन् वा अस्त्यर्थे +इनिः ।) कपटविशिष्टः । कपटधारी । इति शब्दरत्नावली ॥

कपटेश्वरी, स्त्री, (कमिव शुभ्रः पटः वसनं तत्तुल्यं फलं ईष्टे+प्रेरयतीति । कपट+ईश्+वरच्+स्त्रियां ङीप् ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

कपर्द्दः, पुं, (पर्व्व पूरणे+सम्पदादित्वात् भावे क्विप् । "रात् लोपः" । ६ । ४ । २१ । इति वलोपे पर् पूर्त्तिः । केन सुखेन जलेन वा परं पूर्त्तिं ददातीति । क+पर्+दा+सुपीति योगविभागात् कः । कस्य गङ्गाजलस्य परा पूरणेन दापयति शुध्यति वा । क+पर्+दैप् शोधने "आतोऽनुपसर्गे कः" । ३ । २ । ३ । इति कः ।) शिवजटा । इत्यमरः । १ । १ । ३७ ॥ (यथा काशीखण्डे । २९ । ४४ ।
"कमनीयजलाकम्रा कपर्द्दिसुकपर्दगा" ॥)
वराटकः । इति मेदिनी ॥ ("पञ्चभिः कपर्द्दैः पञ्चिका नाम द्यूतमस्ति" । इति पां २ । १ । १० । सूत्रस्य सरला टीका ॥)

कपर्द्दकः, पुं, (कपर्द्द+कन् ।) शिवस्य जटाजूटः । वराटकः । इति मेदिनी । कड़ि इति भाषा ॥ ("यद्यहमिमं शक्तुशरावं विक्रीय दश कपर्द्दकान् प्राप्नोमि" ॥ इति हितोपदेशः ॥) शेषस्य पर्य्यायः । वराटः २ कपर्द्दः ३ वराटिका ४ चराचरः ५ चरः ६ वर्ज्यः ७ बालक्रीड़कः ८ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कर्णशूलव्रणगुल्मशूलनेत्रदोषनाशित्वञ्च ॥ तस्य भेदाः । सुवर्णवर्णा सिंही १ धूम्रवर्णा व्याघ्री २ पीतपृष्ठासितोदरा मृगी ३ श्वेतवर्णा हंसी ४ नातिदीर्घिका विदन्ता ५ । इति राजनिर्घण्टः ॥ (वराटकशब्देऽस्य गुणादयो व्याख्येयाः ॥)

कपर्द्दी, [न्] पुं, (कपर्द्दो जटाजूटोऽस्त्यस्य । इनिः ।) शिवः । इत्यमरः । १ । १ । ३४ ॥ (यथा, महाभारते १३ । १७ । ४५ ।
"अजश्च बहुरूपश्च गन्धधारी कपर्द्द्यपि" ॥
"कपर्द्दी कैलासं करिवरमथोऽयं कुलिशभृत्" । इति कालिदासः ॥
यथा, ऋग्वेदे । १० । १०२ । ८ ।
"शुनमष्ट्रा व्यचरद् कपर्द्दी" ॥)

कपाटं, त्रि, (कं वायुं मस्तकं वा पाटयतीति । पट-गतौ+णिच्+कर्म्मणि उपपदे अण् ।) स्वनामख्यातद्वाराच्छादककाष्ठफलकविशेषः । तत्पर्य्यायः । अररम् २ । इत्यमरः । २ । २ । १७ ॥ कवाटः ३ कपाटी ४ कवाटी ५ अररी ६ अररिः ७ । इति तट्टीका ॥ द्वारकण्टकम् ८ असारम् ९ । इति शब्दरत्नावली ॥ (यथा महाभारते १ । जतुगृहवासे । १४८ । १७ ।
"चक्रे च वेश्मनस्तस्य मध्ये नातिमहाबिलम् ।
कपाटयुक्तमज्ञातं समं भूम्याश्च भारत" ! ॥
कं शिरः इत्युपलक्षणेन मनुष्यादीनां ग्रहणमिति बोध्यम् । कं वातं वा पाटयति वारयति गृहद्वारदेशं आवृणोतीत्यर्थः । मनुष्यवातादीनां गतिं रुणद्धि वा । क+पट्+णिच्+अण् । यथा,
"द्वाराणि समुपावृण्वन् कपाटान्यवघट्टयन्" । इति रामायणम् ।